# Chedinyastavah

# छेदिन्याःस्तवः

## Document Information

Text title : Chedinyastavah

File name : ChedinyAHstavaH.itx

Category : devii, ShaTchakrashakti

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 1 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 1 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# छेदिन्याःस्तवः

अथ वक्ष्ये महादेव्याः छेदिन्याः स्तवमुत्तमम् ।
छेत्ता त्वं सर्वग्रन्थीनां मत्प्रसादाद् यतीश्वरः ॥ ३१-२४॥

यत्प्रसादादनन्तो हि योगी संसारमण्डले ॥ ३१-२५॥

देशानन्दा सकलगुणदा छेदिनी छेदनस्था
हव्यस्था सा विभवनिरता या निधिस्था निशायाम् ।
सा मे नित्यं कुलकमलगा गोपनीया विधिज्ञा
श्रीवागेशी गगनवसना सर्वयोगं प्रपायात् ॥ ३१-२६॥

कामानन्दा मदननिरता भाविता भावसिन्धौ
कामानन्दोद्भवरसवती योगियोगस्थधात्री ।
सा मे धौतं प्रकुरु वपुषो
धर्मपुञ्जं प्रपायात् ॥ ३१-२७॥

कालाकालं कमलकलिकावासिनी कालिका मे
ग्रन्थिच्छेदं स्थिरगृहगता गात्रनाडीपथस्था ।
वक्राम्भोजे वचनमधुरं धारयन्ती जनानाम् ।
सा मे रन्ध्रं मम रुचिरतनोः पातु पञ्चानना या ॥ ३१-२८॥

योगाङ्गस्था स्थितिलयविभवा लोमकूपाम्बुजस्था
माता गौरी गिरिपतिसुता भासुरास्त्रप्रदीप्ता ।
सम्पायान्मे हृदयविवरं छेदिनीमूलपूरे
कैलासस्था मममनुगिरिं पातु रुद्रप्रसादा ॥ ३१-२९॥

नादान्तःस्था मनगुणधरणासन्नसिद्धान्तपारा
भोगानन्दा भगनगबिले काशयन्ती जनानाम् ।
विद्याविद्या विविधगगना छेदिनी छन्नरूपा ।
सा सर्वान्तःकरणनिलया लाकिनी प्रेमभावा ॥ ३१-३०॥

योगं स्वर्गेऽर्पयसि मनसि प्रेमभावं परेशे
या या यात्रा त्रिविधकरणा कारणा सर्वजन्तोः ।
माता ज्ञात्री गणेशे गृहिगणसदया सर्वकर्त्री मनो मे
रक्षा रक्षाक्षरगतकला केवला निष्कला या ॥ ३१-३१॥

सा योगेन्द्रा समवतु मुदा मे गुदं कुण्डलिन्यां
जह्नोः कन्या कमलनिलया राकिणी प्रेमभावान् ।
मोक्षप्राणान् तपनरहिता पातु मे वेदवक्त्रा
सिद्धा मूलाम्बुजदलगता पावनी पातु तुण्डम् ॥ ३१-३२॥

हेरम्बाज्ञा प्रलयघटिता काकिनी क्रोधरूपा ॥ ३१-३३॥

यदि भजति कुलीनः कामिनीं क्रोधविद्यां
स भवति परयोगी छेदिनीस्तोत्रपाठात् ।
सकलदुरितनाशः क्षालनादिप्रसिद्धिः
सकलजनवशः स्यात् तस्य नित्यं सुराज्यम् ॥ ३१-३४॥

एतत् स्तोत्रं पठेद्विद्वान् महासंयमतत्परः ।
मूले मनः स्थिरो याति सर्वानिष्टविनाशनः ॥ ३१-३५॥

सर्वसिद्धिः करे तस्य यो भावं समुपाश्रयेत्
शृणुष्व परमानन्द रससागरसम्भव ॥ ३१-३६॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे
सिद्धिमन्त्रप्रकरणे भैरवभैरवीसंवादे एकत्रिंशः पटले
छेदिन्याः स्तवः समाप्तः ॥ ३१॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Chedinyastavah*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*